# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्यः** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – नव्यन्यायः** | **सत्रम् – २** | **समयः – २:०० तः ४:००** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – पक्षता** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्यां लिखत।**

१ अनुमित्सायाः पक्षतां प्रति कारणत्वम्।

२ पक्षविशेष्यकानुमितौ सिद्धेः प्रतिबन्धकत्वविचारः।

३ सिद्ध्यनुमित्योः प्रतिबध्यप्रतिबन्धकभावः।

४ परामर्शस्य अनुमितिकारणत्वम्।

**प्रश्नः २ सिद्ध्युत्तरं कियत्क्षणमध्ये अनुमितिः जायते इति यथाग्रन्थं विशदयत।**

**प्रश्नः ३ पक्षसाध्यभेदेन पक्षतायाः भेदात्पृथगेव कार्यकारणभाव इति दीधितिं विवृणुत।**

**प्रश्नः ४ सिषाधयिषाविरहेति सार्वभौमपक्षतां विशदयत।**

**प्रश्नः ५ तृतीयक्षणसाधारणव्यवहितोत्तरत्वविचारं समुपस्थापयत।**

**प्रश्नः ६ अधोलिखितेषु द्वयोः व्याख्यां लिखत।**

१ प्रात्यक्षिकसिद्धिपरामर्शानुमितयः पक्षतां प्रति कारणं न वा?

२ अव्यवहितोत्तरत्त्वम्।

३ पक्षतावच्छेदकसामानाधिकरण्यम्।

४ सिषाधयिषाविरहविशेषणस्य आवश्यकता।

**प्रश्नः ७ पुरुषभेदेन पक्षतायाः कार्यकारणभावं विवृणुत।**

**प्रश्नः ८ सिद्ध्युत्तरम् अनुमितौ सिषाधयिषा हेतुरस्तु इत्याक्षेपं निराकुरुत।**

**प्रश्नः ९ पक्षता न अनुमितिहेतुरिति मतमुपन्यसत।**

**प्रश्नः१० उपाध्यायपक्षताम्प्रतिपाद्य वारयत।**

**प्रश्नः११ अधोनिर्दिष्टेषु दशप्रश्नानां लघूत्तराणि लिखत।**

१ उपलक्षितः शब्दस्यार्थः कः?

२ सिषाधयिषा अनुमितिं प्रति कारणं न वा?

३ एकविधात्परामर्शात् द्विविधानुमितिर्भवति न वा?

४ किं नाम समनियतत्वम्?

५ विशिष्टबुद्धौ हेतुः कः?

६ मणिकारोक्तपक्षतालक्षणं किम्?

७ अनुमितौ उत्तेजिका का?

८ सिद्धिसिषाधयिषापरामर्शाः यत्र क्रमशः भवन्ति तत्र अनुमितिः भवति न वा?

९ का नाम सिषाधयिषा?

१० पक्षतां विना अनुमित्युत्पत्तौ को दोषः?

११ अनुमितिप्रतिबन्धकः कः?

१२ अव्यवहितपूर्वत्त्वं नाम किम्?

१३ न हि करिणि दृष्टे चीत्कारेण तमनुमिमते अनुमातारः इति कस्य वचनम्?

१४ तत्त्वचिन्तामणिः केन रचिता?

१५ गदाधरी कस्य ग्रन्थस्य व्याख्या?

***